एकादशः पाठः

विद्याधनम्



न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ 1 ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥ 2 ॥

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ 3 ॥

विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयः
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु॥ 4 ॥

शब्दार्थाः

चौरहार्यम्	–	चोरों के द्वारा चुराने योग्य	to be stolen by a thief
राजहार्यम्	–	राजा के द्वारा छीनने योग्य	to be attacked by a king
भ्रातृभाज्यम्	–	भाइयों के द्वारा बाँटने योग्य	to be divided among brothers
भारकारि	–	भार बढ़ाने वाली	burden
प्रच्छन्नगुप्तम्	–	अत्यन्त गुप्त	hidden
भोगकरी	–	भोग का साधन उपलब्ध कराने वाली	giving objects of pleasure
परा	–	सबसे बड़ी	the greatest
राजसु	–	राजाओं में	among kings
केयूराः	–	बाजूबन्द	bracelets
चन्द्रोज्ज्वला (चन्द्र+उज्ज्वला)	–	चन्द्रमा के समान चमकदार	as bright as the moon
विलेपनम्	–	शरीर पर लेप करने योग्य सुगन्धित-द्रव्य (चन्दन, केसर आदि)	anointing
नालङ्कृता (न+अलङ्कृता)	–	नहीं सजाया हुआ	undecorated
मूर्धजाः	–	वेणी, चोटी	plait (hair)
वाण्येका (वाणी+एका)	–	एकमात्र वाणी	speech alone
समलङ्करोति	–	अच्छी तरह सुशोभित करती है	decorates
संस्कृता	–	संस्कारयुक्त (परिष्कृत)	well cultured
धार्यते	–	धारण की जाती है	is borne
क्षीयन्तेऽखिलभूषणानि (क्षीयन्ते+अखिलभूषणानि	–	सम्पूर्ण आभूषण नष्ट हो जाते हैं	all ornaments perish

भाग्यक्षये	– अच्छे दिन बीत जाने पर	when good days end
आश्रयः	– सहारा	helper
कामदुघा	– इच्छानुसर फल देने वाली	yielding all desired objects
सत्कारायतनम्	– सम्मान का केन्द्र या समूह	storehouse of respects
रत्नैर्विना	– रत्नों से रहित	without jewells
विद्याधिकारम्	– विद्या पर अधिकार	mastery over learning
तस्मादन्यमुपेक्ष्य (तस्मात्+अन्यम्+उपेक्ष्य)	– अतः दूसरे सबको छोड़कर	therefore giving up others





1. उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

(क) विद्या राजसु पूज्यते। ☐

(ख) वाग्भूषणं भूषणं न। ☐

(ग) विद्याधनं सर्वधनेषु प्रधानम्। ☐

(घ) विदेशगमने विद्या बन्धुजनः न भवति। ☐

(ङ) सर्वं विहाय विद्याधिकारं कुरु। ☐

2. अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-

पदानि	लिङ्गम्	विभक्तिः	वचनम्
नरस्य	.....	.....	.....

गुरूणाम्	.....	.....	.....
केयूराः	.....	.....	.....
कीर्तिम्	.....	.....	.....
भूषणानि	.....	.....	.....

3. श्लोकांशान् योजयत-

क	ख
विद्या राजसु पूज्यते न हि धनम्	हारा न चन्द्रोज्ज्वलाः।
केयूराः न विभूषयन्ति पुरुषम्	न भ्रातृभाज्यं न च भारकारि।
न चौरहार्यं न च राजहार्यम्	या संस्कृता धार्यते।
सत्कारायतनं कुलस्य महिमा	विद्या-विहीनः पशुः।
वाण्येका समलङ्करोति पुरुषम्	रत्नैर्विना भूषणम्।

4. एकपदेन प्रश्नानाम् उत्तराणि लिखत-

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

5. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

(क) विद्याविहीनः <u>नरः</u> पशुः अस्ति।

(ख) <u>विद्या</u> राजसु पूज्यते।

(ग) चन्द्रोज्ज्वलाः हाराः पुरुषं न अलङ्कुर्वन्ति।

(घ) पिता हिते नियुङ्क्ते।

(ङ) विद्याधनं सर्वप्रधानं धनमस्ति।

(च) विद्या दिक्षु कीर्तिं तनोति।

6. पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत-

(क) गुरूणां गुरुः का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) भाग्यक्षये आश्रयः कः?

7. मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-

विद्या	धनम्	संस्कृता	सततम्	कुसुमम्	मूर्धजाः	पशुः	गुरुः	रतिः

	पुँल्लिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
यथा-	हाराः	अलङ्कृता	भूषणम्
	.....	.....	.....
	.....	.....	.....
	.....	.....	.....